# Sadhuh Chaitanyakoyanikritam Hari Stotram

# સાધુઃ ચૈતન્યકોયનિકૃતં હરિસ્તોત્રમ્

## Document Information

Text title : Sadhuh Chaitanyakoyanikritam Hari Stotram

File name : sAdhuHchaitanyakoyanikRRitaMharistotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 235/28-78||

Latest update : May 15, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2026

*sanskritdocuments.org*

# સાધુઃ ચૈતન્યકોયનિકૃતં હરિસ્તોત્રમ્

અસઙ્ખ્યાઃ સાધવો યત્ર સ્વતઃપ્રકાશરૂપિણઃ ।
દિવ્યા વસન્તિ ઋષયઃ શરણ્યં પ્રભજન્તિ ચ ॥ ૨૮॥

નમસ્તસ્મૈ નૃનાટ્યાય સર્વાન્તર્યામિણે નમઃ ।
આભ્યન્તરેભ્યઃ શધુભ્યોઽવનં કરોતિ યો હરિઃ ॥ ૨૯॥

નમસ્તસ્મૈ કૃષ્ણનારાયણાય પરમાત્મને ।
આધ્યાત્મિકેભ્યસ્તાપેભ્યશ્ચાધિદૈવિકતસ્તથા ॥ ૩૦॥

આધિભૂતાદિકષ્ટેભ્યો રક્ષકાય નમો નમઃ ।
સામન્તવિક્રમાત્ ક્રૂરાલ્લુણ્ઠકાદ્ધનચન્દ્રકઃ ॥ ૩૧॥

સુખાદેવી ચ તત્પત્ની વણિજો યેન રક્ષિતાઃ ।
સાયનાયનસાધોસ્તુ સમાગમેન મોક્ષિતાઃ ॥ ૩૨॥

સ કૃષ્ણો વર્તતે રક્ષાકરસ્તસ્મૈ નમો નમઃ ।
ધનિષ્ઠકોષં વિપ્રં ચ વારાઙ્ગનાસુ વર્તિતમ્ ॥ ૩૩॥

સ્નેહલતાં ચ તત્પત્નીં ગુરું સોમાયનં તથા ।
નૃપં માલવસિંહં ચ રરક્ષ મોક્ષણં દદૌ ॥ ૩૪॥

નમસ્તસ્મૈ પરેશાય શ્રીકાન્તાય તુ શાર્ઙ્ગિણે ।
રાજીવાખ્યં નૃપં રાજ્ઞીં સાધ્વીં કુન્દનદેવિકામ્ ॥ ૩૫॥

અરક્ષયત્તથાઽમોક્ષયદ્યસ્તસ્મૈ તે નમો નમઃ ।
દેવવિશ્રામસ્ય રક્ષાં કાણ્ડિકાયાશ્ચ મોક્ષણમ્ ॥ ૩૬॥

કૃતં યેન ચ તસ્મૈ શ્રીહરયે વૈ નમો નમઃ ।
હર્ષુલમાલિનં પત્નીં તસ્ય વિદ્રુમવલ્લકીમ્ ॥ ૩૭॥

ઉદ્ધાર હરિર્યઃ શ્રીપતિસ્તસ્મૈ નમો નમઃ ।
શાણધરં પિતૃહણં કર્ષુકં ચ રરક્ષ યઃ ॥ ૩૮॥

વૃષહં નિમ્બદેવં ચ તસ્મૈ કૃષ્ણાય તે નમઃ ।
ભાણ્ડં કાલીન્દરં સાધુકમલાયનયોગતઃ ॥ ૩૯॥

મોક્ષણં ચાપ્રાપયદ્યસ્તસ્મૈ કૃષ્ણાય તે નમઃ ।
નર્તકં રાયણદેવં બોધાયનસ્ય યોગતઃ ॥ ૪૦॥

ગાયકં નાકિરાલાખ્યે પત્તને તુ વ્રતર્દિનમ્ ।
રાજાનં પુણ્ડ્રવર્માણં ય ઉદ્ધાર તે નમઃ ॥ ૪૧॥

વાયકં તૂલવાયાખ્યં સમુદ્ધાર યઃ પ્રભુઃ ।
કાષ્ઠહારં તથા જઙ્ગલદેવં તે નમો નમઃ ॥ ૪૨॥

પણ્યકૃદ્વાત્સલ્યધીરં પત્નીં મઞ્જુલિકાં તથા ।
સાધું સાધ્વીં કૃતવાન્ યસ્તસ્મૈ તુભ્યં નમો નમઃ ॥ ૪૩॥

તિલકરઙ્ગં વનપં શિખાદેવીં ચ તત્પ્રિયામ્ ।
ઉદ્ધાર હરિર્યઃ સ હૃદયસ્થોઽપિ રક્ષતુ ॥ ૪૪॥

ક્ષેત્રપં નાઞ્જકદેવં તથા સ્તેનમહામયમ્ ।
ઉદ્ધાર હરિર્યશ્ચ તસ્મૈ કૃષ્ણાય વૈ નમઃ ॥ ૪૫॥

કિરાતં સાગરાખ્યં તત્પત્નીં ચ સારિકાં તુ યઃ ।
ઉદ્ધાર હરિર્યશ્ચ તસ્મૈ શ્રીપતયે નમઃ ॥ ૪૬॥

હૂણં સારઙ્ગનામાનં રરક્ષ યશ્ચ તે નમઃ ।
યજ્ઞારાધં પુષ્કસં ચ બ્રહ્માયનપ્રસઙ્ગતઃ ॥ ૪૭॥

કુટુમ્બયુક્તં યઃ કૃષ્ણોઽમોક્ષયત્તે નમો નમઃ ।
કપિક્ષયં તુ ચાણ્ડાલં પ્રાજ્ઞેશ્વરં દ્વિજં તથા ॥ ૪૮॥

અમોક્ષયદ્ધરિર્યશ્ચ તસ્મૈ કૃષ્ણાય તે નમઃ ।
નાલીકરં લોહકારં પત્નીં કુન્દનિકાં ચ યઃ ॥ ૪૯॥

અમોક્ષયદ્ભવપાશાત્તસ્મૈ શ્રીવિષ્ણવે નમઃ ।
ચર્મકારં મઙ્ગલાખ્યં પત્નીં વિભાવરીં ચ યઃ ॥ ૫૦॥

વિષાદ્રરક્ષ ભગવાન્ યસ્તસ્મૈ વૈ નમો નમઃ ।
રથકારં હરિદાસં પત્નીં શ્રીમાનવીં તુ યઃ ॥ ૫૧॥

અમોક્ષયત્ પ્રભવે તે વારં વારં નમો નમઃ ।
શિલાહારં દામશિલાદકં પત્નીં કલાભિધામ્ ॥ ૫૨॥

તદ્ભૃત્યાँશ્ચાઽમોક્ષયદ્યસ્તસ્મૈ કૃષ્ણાય તે નમઃ ।
શિલ્પિનં સજ્જયદેવં પત્નીં કેશવતીં ચ યઃ ॥ ૫૩॥

રાજાનં ખડ્ગવર્માણં તથાઽન્યાન્ શિલ્પિનોઽપિ ચ ।
ઉદ્ધાર હરિસ્તસ્મૈ બાલકૃષ્ણાય વૈ નમઃ ॥ ૯૪॥

ચિત્રકૃત્સમ્ભરદેવં ચ ચિત્રંસરિતાં પ્રિયામ્ ।
ચિત્રકારાનપરાન્ યોઽમોક્ષયત્તે નમો નમઃ ॥ ૫૫॥

અઙ્ગારહારિણં મૌક્તિકેશિનં તુ નિજાશ્રિતમ્ ।
તથાઽપરાન્ કર્મચારાન્ યો રરક્ષ ચ તે નમઃ ॥ ૫૬॥

ચક્રધરં લુબ્ધકં યઃ પૌતિમાખ્યોપદેશતઃ ।
અમોક્ષયદ્ધિ સંસારાત્તસ્મૈ કૃષ્ણાય તે નમઃ ॥ ૫૭॥

વાટધરં પિશુનં યો નૃપં સુતારસિંહકમ્ ।
ઘટ્યયનપ્રસઙ્ગેનાઽમોક્ષયત્તે નમો નમઃ ॥ ૯૮॥

વાટધરં સવાસં ચ દ્વૈપીરાજ્ઞીમરક્ષયત્ ।
અમોક્ષયચ્ચ યઃ કૃષ્ણસ્તસ્મૈ નિત્યં નમો નમઃ ॥ ૫૯॥

ગૃહકારં શિવજયં વૃષપર્વપ્રસઙ્ગતઃ ।
અમોક્ષયત્તુ યઃ કૃષ્ણસ્તસ્મૈ શ્રીહરયે નમઃ ॥ ૬૦॥

યશ્ચ સઙ્ગરયાદસ્કં જાલકારમમોક્ષયત્ ।
પત્નીં રૂપાવતીં શુક્લાયનર્ષિસેવયા હરિઃ ॥ ૬૧॥

તથા જાત્યા ભરવાટમુદ્યમશ્રીતિનામકમ્ ।
સતીશ્વરીં ચ તત્પત્નીં વલ્લવીશ્ચોદ્ધાર યઃ ॥ ૬૨॥

ઉષ્ટ્રપાલં દીર્ઘરમ્ભં રામાયનપ્રસઙ્ગતઃ ।
ઉદ્ધાર હરિર્યસ્તં વલ્લભં પ્રણમે પ્રભુમ્ ॥ ૬૩॥

રત્નપ્રભં ખરપાલં નૃસિંહસ્વામિયોગતઃ ।
ઉદ્ધાર હરિર્નારાયણસ્તં પ્રણમામ્યહમ્ ॥ ૬૪॥

ગદાર્દનેશ્વરં વૈદ્યં તત્પત્નીં ચ મુકુન્દિનીમ્ ।
અમોક્ષયદ્ધિ સંસારાદ્યસ્તં નમામિ માપતિમ્ ॥ ૬૫॥

કીશનકુલપાલસ્ય દેશ્યાવનસ્ય મોક્ષણમ્ ।

તત્પત્ન્યાઃ પુરિકાયાશ્ચ ચક્રે યસ્તં નમામિ વૈ ॥ ૬૬॥

નાપિતં હર્ષધર્માખ્યં પત્નીં નિગમિકાં ચ યઃ ।
ભૂભૃતં સ્વર્ણધન્વાનં રાજ્ઞીં ચ પઞ્ચદેવિકામ્ ॥ ૬૭॥

કલ્યાણધામસાધોસ્તુ સમાગમેન તાન્ પ્રભુઃ ।
ઉદ્ધાર હરિર્નારાયણસ્તં પ્રણમામિ વૈ ॥ ૬૮॥

યશ્ચ રૂટાણકીદેવીમાભીરીં દૈત્યધર્ષિતામ્ ।
અરક્ષયદ્બ્રહ્મપ્રિયામધ્યે રૂપેશ્વરીં તુ તામ્ ॥ ૬૯॥

મન્દારકલિકાદ્યાશ્ચ તથાઽન્યા દિવ્યરૂપિણીઃ ।
વ્યધાચ્છ્રીભગવાન્ પત્નીસ્તં નમામિ જનાર્દનમ્ ॥ ૭૦॥

ધીવરં ધીરપર્વાણં નિર્વાણાયનયોગતઃ ।
કૃત્વા તુ પાવનં કૃષ્ણોઽમોક્ષયત્તં નમામ્યહમ્ ॥ ૭૧॥

તારકાદર્શકં શૂલારોપકં ચોદ્ધાર યઃ ।
સુપથાનકભૂપં ચ કૃતશલ્યાં શૂલ્યઙ્ગનામ્ ॥ ૭૨॥

ઉદ્ધાર જટી ભૂત્વા હરિશ્રીકૃષ્ણનન્દનઃ ।
ગોપાલનન્દનં કૃષ્ણં વલ્લભ તં નમામ્યહમ્ ॥ ૭૩॥

જ્વાલાપ્રસાદનામાનં ચાગ્નિદં ચ પ્રભાવતીમ્ ।
નારાયણાયનયોગાદમોક્ષયન્નમામિ તમ્ ॥ ૭૪॥

લવાદનં તુ ગરદં નૃપં શ્રીમાનવેશ્વરમ્ ।
શાન્તેશ્વરં યુવરાજં સૂર્યકાન્તં તુ સૈન્યપમ્ ॥ ૭૫॥

કિંશુકાયનયોગેન સમુદ્ધાર યઃ પ્રભુઃ ।
શ્રીકૃષ્ણં દેશિકં ભક્તહૃદયસ્થં નમામિ તમ્ ॥ ૭૬॥

વિખણ્ડલં શસ્ત્રધરં ભાર્યાં હરસતીં ચ યઃ ।
નિર્મોહનાયનયોગાદમોક્ષયચ્ચ તે નમઃ ॥ ૭૭॥

એવં લક્ષ્મિ સ્તવનં વૈ સાધુશ્ચૈતન્યકાયનિઃ ।
ચક્રે નેમે હરિં સર્વસ્થિતં ચ પરિતસ્તદા ॥ ૭૮॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય
સાધુઃ ચૈતન્યકોયનિકૃતં હરિસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૨૩૫/૨૮-૭૮॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 235/28-78..

Proofread by PSA Easwaran

*Sadhuh Chaitanyakoyanikritam Hari Stotram*

pdf was typeset on May 15, 2026

Please send corrections to *sanskrit@cheerful.com*